# भावयामि रघुरामम्     तालम्ः रूपकम्

# रामायण रागमालिका
## महाराजा स्वाति तिरुनाळ् विरचिता

पल्लवि

सावेरी रागः

भावयामि रघुरामं भव्यगुणारामम्

अनुपल्लवि

सावेरि रागः

भावुकवितरणपरापाङ्गलीलालसितम्

चरणम्

नाट्टकुरञ्जि रागः (बाल काण्डम्)

दिनकरान्वयतिलकं दिव्यगाधिसुतसवना -

वनरचितसुबाहुमुखवधमहल्यापावनम्

अनघमीशचापभङ्गं जनकसुताप्राणेशं
घनकुपितभृगुरामगर्वहरमितसाकेतम् ॥ १ ॥

धन्याशि रागः (अयोध्या काण्डम्)

विहिताभिषेकमथ विपिनगतमार्यवाचा

सहितसीतासौमित्रिं शान्ततमशीलम्

गुहनिलयगतं चित्रकूटागतभरतदत्त -
महित्तरत्नमयपादुकं मदनसुन्दराङ्गम् ॥ २ ॥

मोहन रागः (आरण्य काण्डम्)

विततदण्डकारण्यकगतविराधदळनं

सुचरितघटजदत्तानुपमितवैष्णवास्त्रम्

पतगवरजटायुनुतं पञ्चवटीविहितावासं
अतिघोरशूर्पणखावचनागतखरादिहरम् ॥ ३ ॥

## मुखारि रागः (किष्किन्दा काण्डम्)

कनकमृगरूपधरखलमारीचहरमिह

सुजनविमतदशास्यहृतजनकाजान्वेषणम्

अनघं पंपातीरसङ्गताञ्जनेयनभोमणि-
तनुजसख्यकरं वालितनुदळनमीशम् ॥ ४ ॥

## पूर्विकल्याणि रागः (सुन्दर काण्डम्)

वानरोत्तमसहितवायुसूनुकरार्पित-

भानुशतभास्वरभव्यरत्नाङ्गुळीयम्

तेन पुनरानीतान्यूनचूडामणिदर्शिनं
श्रीनिधिमुदधितीराश्रितविभीषणमिळितम् ॥ ५ ॥

## मध्यमावति रागः (युद्ध काण्डम्)

कलितवरसेतुबन्धं खलनिस्सीमपिशिताशन-

दलनमुरुदशकण्ठविदारमतिधीरम्

ज्वलनपूतजनकसुतासहितयातसाकेतं
विलसितपट्टाभिषेकं विश्वपालं पद्मनाभम् ॥ ६ ॥

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇